# Rishi Agastyaproktam Mrillingamahimopadesham 2

# ઋષિ અગસ્ત્યપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશમ્ ૨

## Document Information

Text title : Rishi Agastyaproktam Mrillingamahimopadesham 2

File name : mRRillingamahimopadesham2.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 656-677||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# Rishi Agastyaproktam Mrillingamahimopadesham 2

# ઋષિ અગસ્ત્યપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
અગસ્ત્યઃ (ઉવાચ)
અતો મૃન્મયલિઙ્ગસ્ય પૂજનં સર્વકામદમ્ ।
તુષ્ટો ભવતિ ગૌરીશો યતો મૃલ્લિઙ્ગપૂજયા ॥ ૬૫૬॥

સમ્પૂજ્ય મૃન્મયં લિઙ્ગં યો નિત્યમનુમોદને(તે) ।
તદ્વારિ મત્તમાતઙ્ગાસ્તિષ્ઠન્ત્યેવામિતા મુને ॥ ૬૫૭॥

મુને પાર્થિવલિઙ્ગસ્ય પૂજનં શઙ્કરપ્રિયમ્ ।
ધર્માર્થકામ મોક્ષાણામચિરેણૈવ દાયકમ્ ॥ ૬૫૮॥

ભસ્મગોમયવાર્ક્ષાદિ લિઙ્ગાન્યપિ સનાતન ।
પૂજનીયાનિ યત્નેન ધનધાન્યાભિવાઞ્છિભિઃ ॥ ૬૫૯॥

મુને ભસ્માદિ લિઙ્ગાનિ મોક્ષદાન્યપિ વસ્તુતઃ ।
ભવન્તિ ભક્તતુષ્ટ્યર્થં ધનધાન્યાન્નદાન્યપિ ॥ ૬૬૦॥

એકૈકમપિ તલ્લિઙ્ગં ધનધાન્યપ્રદં મુને ।
મોક્ષદં ચ તથાપ્યુક્તફલં ભવતિ તત્ક્ષણં(ક્ષણાત્) ॥ ૬૬૧॥

મુને શિવાર્ચનં યસ્માચ્ચતુર્વર્ગફલાર્થિભિઃ ।
શિવોદદાતિ વિષ્ણુત્વં સન્તુષ્ટો લિઙ્ગપૂજયા ॥ ૬૬૨॥

તથા બ્રહ્મત્વમિન્દ્રત્વં દદાત્યેવ મહેશ્વરઃ ।
વિના તપોભિર્દાનૈશ્ચ કેવલં શિવપૂજયા ॥ ૬૬૩॥

મુને ભવન્ત્યભીષ્ટાનિ શ્રી મહેશપ્રસાદતઃ ।
યત્પાદપદ્મમભ્યર્ચ્ય સ્વનેત્રાબ્જેન કેશવઃ ॥ ૬૬૪॥

ચક્રં ચ પ્રાપ ગૌરીશાત્પૂજનીયો મુમુક્ષુભિઃ ।
સ્તુવન્તિ યં સદાદેવા વેદાશ્ચાપિસ્તવોન્મુખાઃ ॥ ૬૬૫॥

સ દેવદેવો ગૌરીશઃ પૂજનીયઃ પ્રયત્નતઃ ।
યમાહુર્વિષ્ણુજનકં યમાહુર્જનકં વિધેઃ ॥ ૬૬૬॥

યમાહુર્ગિરિજાનાથં યમાહુર્મન્દનાન્તકમ્ ।
સ દેવદેવો ગૌરીશઃ પૂજનીયઃ પ્રયત્નતઃ ॥ ૬૬૭॥

યમાહુઃ સ્કન્દજનકં યમાહુઃ સર્વગં પ્રભુમ્ ।
સ દેવદેવો ગૌરીશઃ પૂજનીયઃ પ્રયત્નતઃ ॥ ૬૬૮॥

મુને વિશ્વાધિકં રુદ્રં યમાહુઃ શ્રુતયોઽખિલાઃ ।
સ દેવદેવો ગૌરીશઃ પૂજનીયઃ પ્રયત્નતઃ ॥ ૬૬૯॥

મુને વિશ્વાધિકં રુદ્રમભ્યર્ચ્ય સર્વકામદમ્ ।
પરિત્યજ્યાર્ચયન્ત્યન્યાનમરાન્પામરા નરાઃ ॥ ૬૭૦॥

કો નુ વિશ્વાધિકાદ્રુદ્રાદન્યં પૂજયતિ ભ્રમાત્ ।
ઋતે મહાપાતકિનં પાપિષ્ઠં નરકાશ્રયમ્ ॥ ૬૭૧॥

સર્વદેવોત્તમં સામ્બં યો નાર્ચયતિ સન્તતમ્ ।
દુરાત્મા સ તુ પાપિષ્ઠઃ સ સુરાપઃ સ પુલ્કસઃ ॥ ૬૭૨॥

શિવાર્ચનપરો મર્ત્યો ન બિભેતિ યમાદપિ ।
કિં પુનર્જન્મ મરણજરારોગાદિભિઃ (તો) મુને ॥ ૬૭૩॥

યતશ્ચરમદેહાનાં શિવે ભક્તિઃ પ્રજાયતે ।
તતો જન્મજરાદિભ્યો ન બિભેતિ શિવાર્ચકઃ ॥ ૬૭૪॥

મહદ્ભાગ્યં શામ્ભવાનાં શમ્ભુ સંસક્તચેતસામ્ ।
યતઃ પુનર્નજન્માદિભયં તેષાં મહાત્મનામ્ ॥ ૬૭૫॥

યસ્ય શૈવો ભવામીતિ બુદ્ધિર્ભવતિ ભાગ્યતઃ ।
સ ધન્યઃ કૃતકૃત્યશ્ચ માન્યઃ સર્વામરૈરપિ ॥ ૬૭૬॥

ધન્યાનાં શિવભક્તાનાં મતિર્નિર્મલદેહિનામ્ ।
યદ્ભાગ્યં તાદૃશૈર્ભોગ્યમમરૈરપ્યપેક્ષિતમ્ ॥ ૬૭૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વસિષ્ઠમુનિપ્રતિ ઋષિ અગસ્ત્યપ્રોક્તં મૃલ્લિઙ્ગમહિમોપદેશં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૬૫૬-૬૭૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 656-677..

Notes:
Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Vasiṣṭha Muni વસિષ્ઠ મુનિ) about the merits of worshiping Śiva શિવ, especially through the form of Mṛnmayaliṅga/Mṛlliṅga મૃન્મયલિઙ્ગ/મૃલ્લિઙ્ગ.

Proofread by Ruma Dewan

---

*Rishi Agastyaproktam Mrillingamahimopadesham 2*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*